National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(63): 113-115
© 2025 NJHSR
www.sanskritarticle.com

**प्रज्ञा दूबे**
साहित्य विभागः, (साहित्यसंस्कृतिसंकायः),
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः,
वाराणसी, उत्तरप्रदेशः

**Correspondence:**
**प्रज्ञा दूबे**
साहित्य विभागः, (साहित्यसंस्कृतिसंकायः),
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः,
वाराणसी, उत्तरप्रदेशः

# अधिरामायणं पितृभक्तिः

**प्रज्ञा दूबे**

**प्रस्तावना**

सर्वासामुपनिषदां सर्वासां श्रुतीनां श्रौतवाङ्मयानां वा पर्यायः **"मातृदेवो भव, पितृदेवो भव, अतिथिदेवो भव, आचार्यदेवो भव।"**[1] इति वाक्यत्रितये पर्यवस्यति इति धर्मधुरन्धराणां मतं भ्राजते। अनेन प्रकारेण ज्ञायते मनुष्याणां चतुर्वर्गफलप्राप्तिः चतुर्ष्वादर्शेषु प्रतिष्ठते, मानवः-पितृमान्, मातृमान्, अतिथिमान्, आचार्यवान् भूयात्, चतुर्षु यदि बद्धश्रद्धो मानवो वर्तते चेत् स सर्वेष्वपि लौकिकेषु पारलौकिकेषु च विषयेषु विचक्षणो भवतीति प्राज्ञः प्रमाणम्। अतो मानवैः पितरं प्रति, मातरं प्रति च सर्वदैव उदारचेतसा आज्ञापालकेन च भाव्यम्। प्रकृतस्थले विषयोपस्थापनात् प्राक् पितृपदार्थः मातृपदार्थश्च विमृश्येते यतः एतयोर्भक्तिः श्रेयसी कथं तथा च एतयोरमाननं श्रेयोबाधाय कथमिति प्राथम्येन ज्ञानं स्यात्।

**पितृपदार्थविचारः-**

पाति रक्षति अपत्यम् इति विग्रहे पा रक्षणे इत्यमुपष्माद्धातोः तृच्प्रत्यये पितृशब्दो निष्पद्यते। अस्य पर्यायित्वेन जनकः तातः प्रसविता, वप्ता, जनयिता, गुरुः जन्मदः, जन्यः, जनिता इत्यादयः शब्दाः प्रसिद्धाः सन्ति। ग्रन्थेषु पिता सर्वेषां पूज्यो मान्यो भवति यतः अस्य प्रसादादेव मानवैः सर्वाणि दृश्यानि दृश्यन्ते-

**मान्यः पूज्यश्च सर्वेभ्यः सर्वेषां जनको भवेत्।**
**अहो यस्य प्रसादेन सर्वान् पश्यति मानवः।।**[2]

चाणक्येन पितॄणां पञ्च प्रकाराः निर्दिष्टाः-

**अन्नदाता भयत्राता यस्य कन्या विवाहिता।**
**जनयिता चोपनेता च पञ्चैते पितरः स्मृताः।।**

उपनिषदोऽपि अनुरून्धन्ति पितृदेवो भवेति। एतदनुरोधेन पितुः सेवको, अनुशंसितः पित्रा, पितृवचनानुगन्ता आदर्शपुरुषो भवति। रामः स्वपितृवचनादेव वनं जगाम, पितृवचनादेव सीतां परिणीतवान् बहूनि कार्याणि तथाविधानि अनुष्ठितवान् येनासौ आदर्शपुरुषत्वेन पुरुषोत्तमत्वेन वात्मानमुपस्थापयितुं क्षमोऽभवत्।

**पितृभक्तिविचारः-**

रामस्य पर्शुरामस्य चोभयोर्यदा संवादो जायमान आसीत् तदा भगवान् रघुकुलशिरोमणी रामो दशरथस्य तत्रोपस्थितिमवलोक्य किमपि न जगाद वचः। वस्तुतः पितुरुपस्थित्यां पुत्रेण व्यवहारो न कर्तव्यो यतः पिता सर्वेष्वपि विषयेषु पुत्रादधिकतरं व्यवहारं जानातीति वस्तुस्थितिः। अयञ्चास्य भक्तेः प्रकारोऽपि भवति।

**श्रुत्वा तु जामदग्न्यस्य वाक्यं दाशरथिस्तदा।**
**गौरवाद्यन्त्रितकथः पितू राममथाब्रवीत्।।**[3]

यत्र कुत्रापि व्यवहारे रामः पितुरूपस्थित्यां सर्वमपि पितरं प्रति न्यवेदयत् व्यवहारम्। रामः पित्रा सह अत्यन्तं मधुरया गिरा वचनं व्याजहार। दशरथोऽपि आज्ञापालकं पुत्रमवाप्यात्यन्तं प्रसन्नः सन् राममालिङ्ग्य हर्षमवाप-

**अभिवाद्य ततो रामो वसिष्ठप्रमुखानृषीन्।**
**पितरं विकलं दृष्ट्वा प्रोवाच रघुनन्दनः।**
**रामस्य वचनं श्रुत्वां राजा दशरथः सुतम्।**
**बाहुभ्यां सम्पादितस्तस्य मूर्ध्न्युपाघ्राय राघवम्।।**[4]

रामः पित्रोपदिष्टं कर्म सर्वदैवाविचिन्त्य सहसा सम्पादयामास, रामः पितुराज्ञया पौरजनानां दर्शनार्थमात्मानमतुष्ठितवान् साकमेवान्यामपि कार्याणि पितुः प्रियाणि हितकाराणि च सम्पादयामास-

**पितुराज्ञां पुरस्कृत्य पौराकार्याणि सर्वश।**
**चकार रामः सर्वाणि प्रियाणि च हितानि च।।**[5]

रामस्य सर्वाणि कार्याणि पौरजनहितानि अभवन् तथा च रामं जनाः प्रशंसन्ति इति विचिन्त्यात्यन्तं प्रसन्नमनाः दशरथोऽजायत। वस्तुतः कस्यापि पुत्रस्य ऐदम्प्राथम्येन कर्म भवति पितुः प्रसन्नता तस्मै कर्मणि च रामस्य सर्वापि प्रवृत्तिरासीत्-

**गुरूणां गुरुकार्याणि काले कालेऽन्ववैक्षत।**
**एवं दशरथः प्रीतो ब्राह्मणा नैगमस्तथा।।**[6]

रामः पितृसमः, पित्राज्ञापरिपालकः, योग्यः पुत्रोऽवर्तिष्ट, रामस्य सर्वे गुणाः पराक्रमादयो विषयाश्चामी पितुः प्रसादलभ्या आसन् इति मत्वा पितरं प्रति सदैव कृतज्ञोऽजायत रामः-

**स हि रूपोपपन्नश्च वीर्यवानसूयकः।**
**भूमावनुपमः सूनुर्गुणैर्दशरथोपमः।।**[7]

दशरथः रामस्य अभिषेकं चिकीर्षुः राममाह्वयति, आहूतो रामः पितृभवनं प्रविश्य सर्वादौ साष्टङ्गप्रणिपातं विनिवेदयति। एवम्प्रकारेण रामः शास्त्रानुकूलः पितरमनुगच्छति-

**प्रविशन्नेव च श्रीमान् राघवो भवनं पितुः।**
**ददर्श पितरं दूरात् प्रणिपत्य कृताञ्जलिः।।**[8]

यथा गमनकाले रामः पितरम् प्राणमत् तथैव गमनकालेऽपि पितरं प्राणिपत्य स्वभवनं जगाम। वस्तुतो गमनागमनयोरुभयोः समयेऽभिवादनं ज्येष्ठानां स्मृतिग्रन्थानुरोधादेव वर्तते। अतो रामो यथाशास्त्रं पितरं प्रति बद्धश्रद्धोऽभवत्-

**इत्युक्तः सोऽभ्यनुज्ञातः श्वोभावाविन्यभिषेचने।**
**व्रजेति रामः पितरमभिवाद्याभ्ययाद् गृहम्।।**[9]

रामस्य पितृभक्त्या प्रसन्ना कौशल्यापि रामस्य माताहमिति गौरस्वापदं वच उदीरयति-

**कल्याणे बत नक्षत्रे मया जातोऽसि पुत्रक।**
**येन त्वया दशरथो गुणैराराधितः पिता।।**[10]

यदा रामो वनगमनात् प्राक् पितरमुपागच्छत् तदा तस्य पितुः स्थितिः प्रतिकूलासीत्। दशरथो मूर्च्छितो भूमौ पपात रामस्तं स्वपितरमुपजगाम-

**तं रामोऽभ्यपतत् क्षिप्रं लक्ष्मणश्च महारथः।**
**विज्ञानमिव दुःखेन सशोकं नृपतिं तथा।।**[11]

अथातो मूर्च्छितं पितरम् अत्यन्तम् आदरेण बाहुभ्यामुत्थाय शयाने उदस्थापयत् रामः। वस्तुतो विषमावस्थायामपि पितरं प्रति रामः कदापि क्रुद्धो नाभवत्, यतो हि दशरथेन वनं गन्तुं रामः उपदिष्टः तथापि रामः पितरं प्रति बद्धश्रद्धो बभूव-

**तं परिष्वज्य बाहुभ्यां तावुभौ रामलक्ष्मणौ।**
**पर्यङ्के सीतया सार्धं रुदन्तः समवेशयन्।।**[12]

यदा दशरथो बोधितः तदा रामः पितरं प्रत्युवाच भवान् अस्माकं भर्ता वर्तते अतो वयं वनं गन्तुमाज्ञायै समासक्ताः आज्ञाप्रदानं करोतु। अद्यत्वे प्रायः पुत्राः कुत्रापि गच्छन्तः किं निमित्तम् आज्ञा अस्माभिः भवतः स्वीकार्या इत्युक्त्वा पित्रोर्भनः खेदयन्ति परं रामः समर्थोऽपि सन् पितुराज्ञामन्तरा कुत्रापि न जगाम-

**आपृच्छे त्वां महाराज सर्वेषामीश्वरोऽसि नः।**
**प्रस्थितं दण्डकारण्यं पश्य त्वं कुशलेन माम्।।**[13]

पितरं दुःखपतितमवलोक्य दुःखपूरितानि वचांसि चाकर्ण्य रामः पितरं सान्त्वयाम्बभूव। भवतः आधिपत्ये इदं नगरं पम्फुल्येत, अहं वनं जिगमिषामि, तत्रैव ऊषित्वा जीवनं यापयामि, राज्याकाङ्क्षा मम नास्ति-

**भवान् वर्षसहस्राय पृथिव्या नृपते पतिः।**
**अहं त्वरण्ये वत्स्यामि न मे राज्यस्य काङ्क्षिता।।**[14]

रामः पुनः वदति वर्षाणां चतुर्दशं समतिक्रम्य वनमुपभुज्य, प्रतिज्ञां पूरयित्वा भवतां चरणयोः आत्मानं प्रस्तोष्यामि। एवम्प्रकारेण पितृचरणसेवा राज्यादपि श्रेयस्करीति रामेण प्रकटीकृतम्-

**नव पञ्च च वर्षाणि वनवासे विहृत्य ते।**
**पुनः पादौ ग्रहीष्यामि प्रतिज्ञान्ते नराधिप।।**[15]

पितुः प्रियाय, यशोवृद्ध्यै रामचन्द्रेण वनमाश्रितम् इत्यपि दशरथोऽवोचत्, अनेन ज्ञायते रामः पितरं प्रति अत्यन्तम् आदरान्वितोऽवर्तत-

**दुष्करं क्रियते पुत्र सर्वथा राघव प्रिय।**
**त्वया हि मत्प्रियार्थं तु वनमेवमुपाश्रितम्।।**[16]

पित्रा मातरं कैकयीं प्रति दत्तं वचनं सत्यं भवेदिति धिया रामः पितुरादर्शत्वं यथावत् व्यवस्थापयितुं वनं गन्तुं प्रवृत्तोऽभवत्। वस्तुतः पुत्रस्य दायित्वं भवति पितुः प्रतिज्ञायाः यशसः, वचनस्य च संरक्षणम् इदञ्च कार्यमत्र भगवता जानकी जानिना कृतम्-

**वनवासकृता बुद्धिर्न च मेऽद्य चलिष्यति।**
**यस्तु युद्धे वरो दत्तः कैकेय्यै वरद त्वया।**
**दीयतां निखिलेनैव सत्यस्त्वं भव पार्थिव।।**[17]

दशरथो रामं प्रत्यवोचत्- पितुः सत्यवादितायाः संरक्षार्थं तव त्यागः आश्चर्यमयो नास्ति यतो रामः गुणैरवस्थया च दशरथस्य ज्येष्ठः पुत्रो न तु जन्मनैव। एवम्प्रकारेण ज्ञातुं शक्यते रामो न केवलं त्यागविषयेऽपि तु सर्वस्मिन् अपि विषये पितुः समर्थको बभूवेति-

**न चैतदाश्चर्यतमं यत् त्वं ज्येष्ठः सुतो मम।**
**अपानृतकथं पुत्र पितरं कर्तुमिच्छसि।।**[18]

**उपसंहारः**

इत्येवम्प्रकारेण समग्रेऽपि रामायणे पितृभक्त्या विक्षणमुदाहरणं महाकविना प्रास्तावीति सकलस्यादिकाव्यस्यावगाहनेन ज्ञातुं प्रवर्त्तामहे। पिता न केवलं गुरुरूपो न चापि लोकसंसाधनसाधनः सेवितः पिता मोक्षमार्गं विवृणुते इत्यपि दृष्टिरस्ति भारतीयानाम् अतः सर्वैरस्माभिःपितुःसेवा कर्तव्येत्युपनिषद्दृष्टिः प्रवर्धनीया।

**सन्दर्भ**


1. अमरकोष. 2/6/29
2. ब्रह्मवैवर्तपुराण, गणपतिखण्ड, कार्तिकेय संवाद, अ. 44
3. रामायणम् 1/76/1
4. रामायणम् 1/77/2-4
5. रामायणम् 1/77/21-22
6. रामायणम् 1/77/23
7. रामायणम् 2/1/9
8. रामायणम् 2/4/10
9. रामायणम् 2/4/28
10. रामायणम् 2/4/28
11. रामायणम् 2/4/40
12. रामायणम् 2/34/20
13. रामायणम् 2/34/22
14. रामायणम् 2/34/28
15. रामायणम् 2/34/29
16. रामायणम् 2/34/35
17. रामायणम् 2/34/42
18. रामायणम् 2/34/38